# Shri Lakshmi Stuti 2

# શ્રીલક્ષ્મીસ્તુતિઃ ૨

## Document Information

Text title : Lakshmi Stuti 2

File name : lakShmIstutiH2.itx

Category : devii, lakShmI, ApaTIkara

Location : doc_devii

Author : ma. sa. ApaTIkara

Transliterated by : Mandar Mali aryavrutta gmail.com

Proofread by : Mandar Mali aryavrutta gmail.com

Description/comments : stotrapanchadashI by Shri M. S. Apatikar, Satara

Source : Sharada year 11, Vol 21-22, September 1970

Acknowledge-Permission: Pt. Vasant A. Gadgil, Sharada Gaurava Granthamala, 425 Sadashv Peth, Pune 30

Latest update : September 14, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose. Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

**Please help to maintain respect for volunteer spirit.**

September 15, 2019

*sanskritdocuments.org*

# શ્રીલક્ષ્મીસ્તુતિઃ ૨

(પૃથ્વી)
પયોધિતનયે રમેઽમતસહોદર ત્વાં ભજે
દયામયિ સદા દયાં કુરુ મયિ ત્વમેતાવતી ।
કરામ્બુજનિવાસિની ભવ સદા મમોદ્ધારિણી
મદીયસદને સદા નિવસ પદ્મનાભપ્રિયે ॥ ૧॥

સરોજવદનામ્બુજે સરસિજાસનાધિષ્ઠિતે
સરોરુહપદામ્બુજે સરસિજોરુપદ્માસને ।
સરોજનયને સદા સરસિજપ્રિયે દેવતે
મદન્તરનિવાસિની ભવ સદા જગન્મોહિની ॥ ૨॥

નમામિ હરિવલ્લભાં સકલભાગ્યદામિન્દિરાં
ભજામિ ભવતારિણીં સકલભક્તકામપ્રદામ્ ।
સ્તવીમિ મનસા તથા સ્તવનગાયનૈસ્ત્વાં સદા
ભવામિ નતમસ્તકસ્તવ પુરો હિરણ્યપ્રદે ॥ ૩॥

નમન્તિ મુનિનાં ગણા નૃપતયો મહીપા અપિ
સ્તુવન્તિ વિબુધાસ્તથા મનુજરાક્ષસાસ્ત્વાં સદા ।
ત્વયૈવ મધુસૂદનો ભવતિ દેવિ લક્ષ્મીયુત-
સ્ત્વયા વિરહિતઃ પ્રભુર્ભવતિ વામનો સિન્ધુજે ॥ ૪॥

ત્વમેવ કૃપયા ધનં વિતર દેવિ દીને જને
ભવામિ નતમસ્તકસ્તવ પુરઃ સુરૈઃ પૂજિતે ।
અશેષભયનાશિની ત્વમસિ શેષશય્યાઙ્ગને
નતોઽસ્મિ પદપઙ્કજે તવ ચ લક્ષ્મ્યતોઽહં સદા ॥ ૫॥

સરોજવદને સદા તવ કૃપાકટાક્ષં ક્ષિપ
સ્મિતાનનસરોરુહે મધુતરાં ગિરં દેહિ મે ।
મમાશિવવિનાશિની ભવ સદા સુચન્દ્રાનને

ભવાબ્ધિસલિલાદ્ દ્રુતં જનનિ તારયેમં જનમ્ ॥ ૬॥

ભ્રમામિ ભવવાલુકાનિકરતપ્તદેહઃ સદા
કૃપાસલિલવર્ષિણી ભવ દયામ્બુકાદમ્બિની ।
તવૈવ કૃપયા દયામયિ મનઃ સદૈવાઽસ્તુ મે
સ્વધર્મપરિપાલને, કુરુ ચ માં સમર્થં જને ॥ ૭॥

હિરણ્મયિ સુવર્ણદે કનકદેવતે પાહિ માં
પ્રયચ્છ સુધનં સદા વિધનિને હિરણ્યાર્થિને ।
ત્વદીયચરણામ્બુજે સરસિજે મમ પ્રાર્થના
ત્વયા સહ નિરન્તરં વસતુ મદ્ગૃહે માધવઃ ॥ ૮॥

લક્ષ્મીસ્તુતિમિમાં રમ્યાં શ્રદ્ધયા યઃ પઠેન્નરઃ ।
વિનાશ્ય વિપદં તસ્ય લક્ષ્મીઃ સૌભાગ્યદા ભવેત્ ॥ ૯॥

ઇતિ શ્રી આપટીકરવિરચિતા શ્રીલક્ષ્મીસ્તુતિઃ સમાપ્તા ।

Encoded and proofread by Mandar Mali aryavrutta gmail.com

*Shri Lakshmi Stuti 2*
pdf was typeset on September 15, 2019

Please send corrections to *sanskrit@cheerful.com*